# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

**कक्षा- तत्त्वाचार्यः (SEM-1)** **प्रश्नपत्र-२** **गुणाः - ७०**

**विषयः- साहित्यम्** **समयः - ११ तः ०२**

**दिनाङ्कः - २५/११/२०१६** **सन्दर्भग्रन्थः - काव्यानुशासनम्**

---

**॥ प्रथमान्वितिः ॥**

**प्र-१ एकं सूत्रं ससन्दर्भं स्पष्टयन्तु। ०४**

१. अङ्गाश्रिता अलङ्काराः।

२. विकृतस्वरश्रवणादिविभावं करकम्पाद्यनुभावं शङ्कादिव्यभिचारि भयं भयानकः।

**प्र-२ काव्यप्रयोजनं ग्रन्थानुसारं समीक्षयन्तु। १२**

**अथवा**

**रसलक्षणं विवेचयन्तु।**

**प्र-३ द्वयोः उत्तरं लिखन्तु। ०४**

१. हेमचन्द्राचार्यस्य जीवनपरिचयं संक्षेपेण ददतु।

२. हेमचन्द्राचार्येण रचिताः ग्रन्थाः के के सन्ति?

३. कतिविधा प्रतिभा? सहजाप्रतिभायाः लक्षणं लिखन्तु।

**॥ द्वितीयान्वितिः ॥**

**प्र-४ एकं ससन्दर्भं समीक्षयन्तु। ०४**

१. रसादेः स्वशब्दोक्तिः क्वचित् सञ्चारिवर्जं दोषः।

२. दीप्तिहेतुरोजो वीरबीभत्सरौद्रेषु क्रमेणाधिकम्।

**प्र-५ अधोलिखिताभ्यः द्वे टिप्पण्यौ लिखन्तु। ०८**

१. माधुर्यगुणः।

२. विभावानुभावक्लेशव्यक्तिः - रसदोषः।

३. प्रसादगुणः।

४. निरर्थकासाधुत्वे पदस्य।

**प्र-६ निम्नलिखितेभ्यः त्रयाणां प्रश्नानां लघूत्तराणि लिखन्तु। ०३**

१. रसदोषाः कति सन्ति?

२. गुणाः कति सन्ति? के च ते?

३. अर्थदोषान् लिखन्तु।

४. दोषः कदा गुणायते?

५. काव्यानुशासनस्य कस्मिनध्याये दोषचर्चा वर्तते?

**॥ तृतीयान्विति: ॥**

**प्र-७ निम्नलिखितेभ्यः एकं सूत्रं समीक्षयन्तु । ०४**

१. स्वरव्यञ्जनस्थानगत्याकारनियमच्यूतगूढादि चित्रम् ।

२. श्लिष्टविशेषणैरूपमानधीः समासोक्तिः ।

**प्र-८ अधोलिखितेभ्यः द्वौ अलङ्कारौ सोदाहरणं स्पष्टयन्तु । ०८**

१. यमकम् ।

२. उपमा ।

३. अर्धान्तरन्यासः ।

४. व्याजस्तुतिः ।

**प्र९ निम्नलिखितेभ्यः त्रयाणां प्रश्नानाम् उत्तरं लिखन्तु । ०३**

१. लाटानुप्रासालङ्कारस्य लक्षणं लिखन्तु ।

२. शब्दालङ्काराः कति सन्ति?

३. उत्प्रेक्षालङ्कारस्य उदाहरणं लिखन्तु ।

४. सतां शीलं न तु काञ्चननिर्मितम् । किमादेयं प्रयत्नेन धर्मो न तु धनादिकम् – इत्यत्र कोऽलङ्कारः?

**॥ चतुर्थान्विति: ॥**

**प्र-१० निम्नलिखिताभ्याम् एकं सूत्रं ससन्दर्भं विवेचयन्तु । ०४**

१. स्वयमूढा शीलादिमती स्वा ।

२. गद्यपद्यमयी साङ्का सोच्छ्वासा चम्पूः ।

**प्र-११ नायकस्य गुणान् समीक्षन्तु । १२**

**अथवा**

**श्रव्यकाव्यस्य प्रकारान् विवेचयन्तु ।**

**प्र-१२ द्वयोः प्रश्नयोः उत्तरं लिखन्तु । ०४**

१. स्वाधीनपतिका-नायिकायाः अर्थं लिखन्तु ।

२. किं नाम धैर्यम् ।

३. महाकाव्यस्य लक्षणं ददतु ।